श्री वेंकटेश्वर नवरत्नमालिका स्तुतिः

श्री वेंकटेश्वर नवरत्नमालिका स्तुतिः

श्रीमानंभोधिकन्याविहरणभवनीभूतवक्षःप्रदेशः
भास्वद्भोगींद्रभूमीधरवरशिखरप्रांतकेलीरसज्ञः |
शश्वद्ब्रह्मेंद्रवह्निप्रमुखसुरवराराध्यमानांघ्रिपद्मः
पायान्मां वेंकटेशः प्रणतजनमनःकामनाकल्पशाखी || 1 ||

यस्मिन् विश्वं समस्तं चरमचरमिदं दृश्यते वृद्धिमेति
भ्रश्यत्यंते च तादृग्विभवविलसितस्सोऽयमानंदमूर्तिः |
पद्मावासामुखांभोरुहमदमधुविद्विभ्रमोन्निद्रचेताः
शश्वद्भूयाद्विनम्राखिलमुनिनिवहो भूयसे श्रेयसे मे || 2 ||

वंदे देवं महांतं दरहसितलसद्वक्त्रचंद्राभिरामं
नव्योन्निद्रावदातांबुजरुचिरविशालेक्षणद्वंद्वरम्यं |
राजन्मार्तांडतेजःप्रसितशुभमहाकौस्तुभोद्भास्युरस्कं
शांतं श्रीशंखचक्राद्यमलकरयुतं भव्यपीतांबराढ्यं || 3 ||

पायाद्विश्वस्य साक्षी प्रभुरखिलजगत्कारणं शाश्वतोऽयं
पादप्रह्वाघराशिप्रशमननिभृतांभोधरप्राभवो मां |
व्यक्ताव्यक्तस्वरूपो दुरधिगमपदः प्राक्तनीनां च वाचां
ध्येयो योगींद्रचेतस्सरसिजनियतानंददीक्षाविहारः || 4 ||

आद्यं तेजोविशेषैरुपगतदशदिङ्मंडलाभ्यंतरालं
सूक्ष्मं सूक्ष्मातिरिक्तं भवभयहरणं दिव्यभव्यस्वरूपं |
लक्ष्मीकांतं खगेंद्रध्वजमघशमनं कामितार्थैकहेतुं
वंदे गोविंदमिंदीवरनवजलदश्यामलं चारुहासं || 5 ||

राकाचंद्रोपमास्यं ललितकुवलयश्याममंभोजनेत्रं
ध्यायाम्याजानुबाहुं हलनलिनगदाशार्ङ्गरेखांचितांघ्रिं |
कारुण्यांचत्कटाक्षं कलशजलधिजापीनवक्षोजकोशा-
श्लेषावातांगरागोच्छ्रयललितनवांकोरुवक्षस्स्थलाढ्यं || 6 ||

श्रीमन्संपूर्णशीतद्युतिहसनमुखं रम्यबिंबाधरोष्ठं
ग्रीवाप्रालंबिवक्षस्स्थलसततनटद्वैजयंतीविलासं |
आदर्शौपम्यगंडप्रतिफलितलसत्कुंडलश्रोत्रयुग्मं
स्तौमि त्वां द्योतमानोत्तममणिरुचिरानल्पकोटीरकांतं || 7 ||

सप्रेमौत्सुक्यलक्ष्मीदरहसितमुखांभोरुहामोदलुभ्य-
-न्मत्तद्वैरेफविक्रीडितनिजहृदयो देवदेवो मुकुंदः |
स्वस्ति श्रीवत्सवक्षाः श्रितजनशुभदः शाश्वतं मे विदध्यात्
न्यस्तप्रत्यग्रकस्तूर्यनुपमतिलकप्रोल्लसत्फालभागः || 8 ||

श्रीमान् शेषाद्रिनाथो मुनिजनहृदयांभोजसद्राजहंसः |
सेवासक्तामरेंद्रप्रमुखसुरकिरीटार्चितात्मांघ्रिपीठः |
लोकस्यालोकमात्राद्विहरति रचयन् यो दिवारात्रलीलां
सोऽयं मां वेंकटेशप्रभुरधिककृपावारिधिः पातु शश्वत् || 9 ||

श्रीशेषशर्माभिनवोपवलुप्ता
प्रियेण भक्त्या च समर्पितेयं |
श्रीवेंकटेशप्रभुकंठभूषा
विराजतां श्रीनवरत्नमाला || 10 ||

इति श्री वेंकटेश्वर नवरत्नमालिका स्तुतिः समाप्ता |